**अध्यायः 6**

# राज्यं राजा अथ च प्राचीनगणराज्यम्



निर्वाचनस्य दिनम्

यदा शंकरनः जागृतः तदा सः दृष्टवान् यत् तस्य मातामहीमातामहौ मतदानं कर्तुं गच्छन्तौ आस्ताम्। वस्तुतः तौ निर्वाचनकेन्द्रं सर्वेभ्यः पूर्वं प्राप्तुम् इच्छतः स्म । शंकरनः जिज्ञासते स्म यत् वस्तुतः तौ एतावन्तौ उत्साहितौ किमर्थम् आस्ताम् । तस्य मातामहः तं शीघ्रतया बोधनस्य प्रयासं कृतवान् अपि च उक्तवान् "अद्य वयं स्वशासकान् चेतुं गच्छन्तः स्मः"।

## केचन जनाः शासकाः कथं जाताः ?

प्रायः पञ्चाशतः वर्षेभ्यः वयं स्वशासकानां निर्वाचनं मतदान-माध्यमेन कुर्वन्तः स्मः। परन्तु प्राचीनतमे काले जनाः शासकाः कथं जायन्ते स्म ? अस्माभिः पञ्चमाध्याये पठितम् अस्ति यत् केचन राजानः सम्भवतः जनैः चीयन्ते स्म । परन्तु प्रायः ३०००वर्षेभ्यः पूर्वं राजा भवितुम् एतस्यां प्रक्रियायां कानिचन परिवर्तनानि जातानि दृष्टानि वा। केचन जनाः महतः यज्ञान् आयोज्य नृपरूपेण प्रतिष्ठिताः अभवन्।

अश्वमेधयज्ञः कश्चित् एतादृशम् एव आयोजनम् आसीत्। एतस्मिन् कश्चित् घोटकः नृपस्य जनानां संरक्षणे स्वतन्त्रविचरणाय त्यज्यते स्म। यदि एतं घोटकं कश्चित् अपरः राजा अवरुणद्धि तर्हि तेन अश्वमेधकर्त्रा राज्ञा सह युद्धं करणीयं भवति स्म। यदि ते तथा न कुर्युः तर्हि तस्य अर्थः यत् अश्वमेधकर्ता राजा अपरेषां नृपाणाम् अपेक्षया आधिक्येन शक्तिशाली अस्ति इति अवगम्यते स्म । तदनन्तरं ते राजानः यज्ञे आमन्त्र्यन्ते स्म । सः यज्ञः विशिष्टपुरोहितैः सम्पद्यते स्म । एतदर्थं ते उपहारैः सम्मानिताः क्रियन्ते स्म। अश्वमेधकर्ता राजा बहुशक्तिशाली इति मन्यते स्म। यज्ञे आमन्त्रिताः सर्वे राजानः तस्मै उपहाराणि आनयन्ति स्म।

एतेषु सर्वेषु आयोजनेषु नृपस्य मुख्यं स्थानं भवति स्म। सः राजसिंहासने अथवा व्याघ्रचर्ममये विशिष्टे आसने उपवेश्यते स्म। युद्धक्षेत्रे नृपस्य सारथी एव तस्य सहचरः भवति स्म। यज्ञस्य अवसरे सः नृपस्य विजयानां अन्यगुणानां च गानं करोति स्म। नृपस्य सम्बन्धिनः विशेषतया तस्य महिषीभिः पुत्रैः अपि कानिचन लघ्वनुष्ठानानि करणीयानि भवन्ति स्म । अन्येषाम् आमन्त्रितराज्ञां कार्यं केवलम् उपविश्य यज्ञप्रक्रियादर्शनम् आसीत्। राजानम् उपरि पुरोहितः पवित्रजलस्य सेचनेन सह एव अन्यानि अनुष्ठानानि करोति स्म। विश् अथवा वैश्यसदृशाः सामान्यजनाः उपहाराणि

आनयन्ति स्म । यान् पुरोहिताः शूद्रान् इति मन्यन्ते स्म ते अनेकेषु अनुष्ठानेषु न आहूयन्ते स्म अथवा न सम्मेल्यन्ते स्म।

एतस्मिन् यज्ञे सम्मिलितानां काञ्चित् सूचीं निर्मातु। व्यवसायस्य आधारेण तत्र के के वर्गाः सम्मिलिताः आसन्?

### वर्णः

तस्मिन् काले उत्तरभारते विशेषतया गङ्गायुमनाक्षेत्रे अनेके ग्रन्थाः रचिताः । एतेषां रचना ऋग्वेदस्य पश्चात् जाता तस्मात् कारणात् एते उत्तर-वैदिक-ग्रन्थाः उच्यन्ते। एतेषाम् अन्तर्गतं सामवेदः यजुर्वेदः अथर्ववेदः अन्ये ग्रन्थाः च सम्मिलिताः सन्ति । पुरोहितैः रचितेषु एतेषु ग्रन्थेषु विभिन्नप्रकारकाणाम् अनुष्ठानानां तेषां सम्पादनस्य च विधयः बोधिताः सन्ति। एतेषु सामाजिकनियमानां विषये अपि वर्णितम् अस्ति।

तस्मिन् समये समाजे अनेके समूहाः आसन् येषु पुरोहित-योद्धृ-कृषक-पशुपालक-वणिक्-शिल्पकार-श्रमिकाः मत्स्यग्राहिणः वन्यजनाः च सम्मिलिताः आसन्। यत्र केचन पुरोहिताः योद्धारः च वैभवशालिनः आसन् तत्र एव केचन कृषकाः वणिजः च अपि धनवन्तः आसन् । अपरस्मिन् पक्षे पशुपालक-शिल्पकार-श्रमिक-मत्स्यग्राहि-आखेटकाः भोजनसङ्ग्राहकाः च निर्धनाः आसन्।

पुरोहिताः जनान् चर्तुषु भागेषु विभक्तवन्तः ये वर्णाः इति उच्यन्ते । तेषाम् अनुसारं प्रत्येकं वर्णस्य पृथक् पृथक् कार्याणि निर्धारितानि आसन्। प्रथमः वर्णः ब्राह्मणानाम् आसीत्। तेषां कार्यं वेदानाम् अध्ययनम् अध्यापनं यजनं याजनं च आसीत् यस्य कृते तेभ्यः उपहारस्वरूपेण वस्तूनि लभन्ते स्म । द्वितीयं स्थानं शासकानाम् आसीत् ये क्षत्रियाः इति उच्यन्ते स्म। तेषां कार्यं युद्धं जनानां रक्षणं च आसीत् । तृतीये स्थाने विशः वैश्याः वा आसन्। यत्र कृषक-पशुपालक-वणिजः च आगच्छन्ति स्म। क्षत्रियाः वैश्याः च यष्टुम् अधिकारिणः आसन्। वर्णेषु अन्तिमं स्थानं शूद्राणाम् आसीत्। तेषाम् कार्यं अन्येषां त्रयाणां वर्णानां सेवनम् आसीत्। एते अनुष्ठानं कर्तुम् अधिकारिणः नासन्। प्रायः महिलाः अपि शूद्रवत् अमन्यन्त । महिलाः शूद्राः च वेदान् अध्येतुम् अधिकारिणः न आसन्।

पुरोहितानाम् अनुसारं सर्वेषां वर्णानां निर्धारणं जन्मनः आधारेण भवति स्म । उदाहरणार्थं ब्राह्मणपित्रोः सन्ततिः ब्राह्मणः एव भवति स्म । पश्चात् केचन जनाः अस्पृश्याः इति अमन्यन्त । अस्पृश्यवर्गेषु केचन शिल्पकाराखेटक-भोजनसङ्ग्राहकाः सम्मिलिताः आसन् । सहैव तेषु तेषां जनानाम् अपि समावेशः आसीत् ये शवान् प्रेतभूमौ स्थापयन्ति स्म ज्वालयन्ति स्म च । एतादृशैः जनैः सह सम्पर्कः स्पर्शः वा अपवित्रता इति मन्यते स्म ।

कैश्चित् जनैः ब्राह्मणैः प्रकल्पिता एषा वर्णव्यवस्था न अङ्गीकृता । केचन जनाः आत्मानं पुरोहितेभ्यः वयं श्रेष्ठाः इति मन्यन्ते स्म। केचन जनाः जन्माधारितं वर्णनिर्धारणं समीचीनं न मन्यन्ते स्म। एतद् अतिरिच्य केचन जनाः व्यवसायस्य आधारेण जनानां मध्ये भेदभावं समीचीनं न मन्यन्ते स्म। यद्यपि केचन जनाः इच्छन्ति स्म यत् अनुष्ठानसम्पन्नकरणस्य अधिकारः सर्वेषां भवेत्। केचन जनाः अस्पृश्यतायाः आलोचनां कृतवन्तः । अस्य उपमहाद्वीपस्य पूर्वोत्तरक्षेत्रेषु यथा बहुषु क्षेत्रेषु सामाजिकार्थिकासमानताः अल्पाः आसन्। अत्र पुरोहितानां प्रभावः अपि बहु न्यूनः आसीत्।

जनाः वर्णव्यवस्थायाः विरोधं किमर्थं कृतवन्तः?

## जनपदाः

महायज्ञकर्तारः राजानः अधुना जनस्य राजानः न भूत्वा जनपदानां राजानः इति अमन्यन्त। जनपदस्य शाब्दिकार्थः जनवासस्य स्थानं भवति स्म। केचन महत्त्वपूर्णाः जनपदाः चतुर्थे मानचित्रे ५७ पृष्ठे च दर्शिताः सन्ति।

पुरातत्त्वविदः एतेषां जनपदानाम् अनेकेषां वसतीनां खननं कृतवन्तः। देहल्यां पुरातनदुर्गः उत्तरप्रदेशे मेरठस्य पार्श्वे हस्तिनापुरम् एटायाः च समीपे अतरंजीखेडाः एतेषु प्रमुखाः सन्ति। खननेन अवगतं यत् जनाः पर्णकुटीरेषु निवसन्ति स्म अपि च पशूनाम् अन्यप्राणिनां च पालनं कुर्वन्ति स्म। ते तण्डुल-गोधूम-धान्य-यव-द्विदल-इक्षु-तिल-सर्षपसदृशानां सस्यानाम् उत्पादनं कुर्वन्ति स्म।

किं भवान् एतस्यां सूच्यां कस्यचित् एतादृशस्य सस्यस्य नाम प्राप्तवान् यस्य उल्लेखः चतुर्थाध्याये नास्ति ?

चित्रित-धूसर-पात्रम्

एतादृशेषु पात्रेषु अधिकांशतः स्थालिकाः कटोरिकाः च एव प्राप्ताः सन्ति। एतानि पात्राणि सुन्दराणि कृशतलमयानि स्निग्धानि च सन्ति। प्रायः एतेषां प्रयोगः विशिष्टावसरेषु महत्त्वपूर्णजनानां कृते भोजनं परिवेषयितुं क्रियते स्म।



जनाः मृत्पात्राणि अपि निर्मान्ति स्म। एतेषु कानिचन बभ्रुवर्णीयानि कानिचन च रक्तवर्णीयानि भवन्ति स्म। एतेषु पुरास्थलेषु केचन विशेषप्रकारकाणि पात्राणि अलभन्त। यानि चित्रितधूसरपात्राणां रूपेण ज्ञायन्ते। यथा एतेषां नामभिः एव स्पष्टम् अस्ति, यत् एतेषु पात्रेषु चित्रकलाकृतिः वर्तते। एतेषु पात्रेषु सामान्यतया चित्रकला सरलरेखाणां ज्यामितीयाकृतीनां च रूपेण कृता वर्तते।

## महाजनपदाः

प्रायः २५००वर्षेभ्यः पूर्वं केचन जनपदाः अधिकाः महत्त्वपूर्णाः आसन्। एते महाजनपदाः इति उक्ताः। चतुर्थे मानचित्रे केचन महाजनपदाः दर्शिताः सन्ति। काश्चित् राजधान्यः दुर्गैः अपि रक्षिताः आसन् अर्थात् एताः राजधानीः परितः काष्ठेष्टिका-पाषाणनिर्मितानाम् उच्चभित्तीनां निर्माणं कृतम् आसीत्। अर्थात् एताः परितः काष्ठेष्टिका-पाषाणनिर्मितानां उच्चभित्तीनां निर्माणं कृतम् आसीत्।

इत्थम् अनुभूयते यत् अन्येषां राज्ञाम् आक्रमणभयेभ्यः स्वसुरक्षार्थम् एतेषां दुर्गाणां निर्माणं राजानः कृतवन्तः। केचन राजानः स्वराजधानीं परितः विशालानां उन्नतानां

प्रभावशालिनीनां भित्तीनां च निर्माणं कारयित्वा स्वसमृद्धेः शक्तेश्च प्रदर्शनम् अपि कुर्वन्ति स्म। अनेन प्रकारेण दुर्गस्य अन्तः उषितेषु जनेषु तस्मिन् क्षेत्रे च अपि नियन्त्रणं सरलं भवति स्म । एतादृशीनां विशालभित्तीनां निर्माणाय व्यापकयोजनायाः आवश्यकता आसीत् एवञ्च लक्षाधिकसङ्ख्याकानाम् इष्टिकानां पाषाणानां च प्रबन्धः अपि करणीयः भवति स्म । सहस्राधिकाः स्त्रीपुरुषाः बालकाः च एतस्य कृते अश्रान्तपरिश्रमं कृतवन्तः स्युः । एतस्य कृते संसाधनानाम् आवश्यकता स्यात्।

इदानीं राजानः सेनाव्यवस्थां कल्पितवन्तः । सैनिकेभ्यः नियमितवेतनं दीयते स्म अतः ते एकवर्षार्थं नियुक्ताः भवन्ति स्म । कञ्चित् देयः सम्भवतः आहतमुद्राणां रूपेण



भवति स्म । ९२ पृष्ठे चित्रं पश्यतु । एतेषां नाणकानां विषये भवान् नवम्यां कक्ष्यायां पठिष्यति।

महाजनपदीयाः राजानः ऋग्वेदोल्लिखितराजभ्यः कथं भिन्नाः आसन्। भेदद्वयं ज्ञापयतु।

कौशाम्बीदुर्गस्य भित्तिः।



इदं चित्रम् आधुनिकोत्तरप्रदेशस्थस्य इलाहाबादस्य समीपात् लब्धायाः इष्टिकाभित्तेः अवशेषस्य अस्ति । एतस्य एकस्य भागस्य निर्माणं सम्भवतः २५०० वर्षेभ्यः पूर्वम् अभवत्।

## राजस्वम्

महाजनपदीयाः राजानः विशालदुर्गाणि निर्मापयन्ति स्म अपि च तेषां पार्श्वे महत् सैन्यबलं भवति स्म, अतः तेषां कृते प्रचुरसंसाधनानाम् आवश्यकता भवति स्म । एतदर्थं तेषां कृते कर्मचारिणाम् अपि आवश्यकता भवति स्म । अतः महाजनपदिनः राजानः जनैः प्रदत्तानाम् उपहारवस्तूनाम् उपरि अनाश्रिताः भूत्वा अधुना नियमितरूपेण राजस्वग्रहणम् आरब्धवन्तः ।

- प्रवर्तित-राजकरेषु सस्यकरः महत्त्वपूर्णतमः आसीत् यतो हि आधिक्येन जनाः कृषकाः एव आसन् । प्रायः उत्पादनस्य १/६ इति भागः राजस्वस्य रूपेण निर्धार्यते स्म यः भागः इति उच्यते स्म ।
- शिल्पकाराः राजकरं यच्छन्ति स्म किन्तु अयं प्रायः श्रमस्य रूपेण प्रत्यर्प्यते स्म । यथा केनचित् तन्तुवायेन लौहकारेण सुवर्णकारेण च राज्ञः कृते मासे एकस्मिन् दिने कार्यं करणीयं भवति स्म ।
- पशुपालकैः पशूनां रूपेण अथवा तेषाम् उत्पादस्य रूपेण राजकरः दातव्यः भवति स्म ।
- वणिग्भिः अपि क्रयणे विक्रयणे वा राजकरः दातव्यः भवति स्म ।
- आखेटकैः सङ्ग्राहकैः च वनेभ्यः प्राप्तवस्तूनि राजकररूपेण दातव्यानि भवन्ति स्म ।

आखेटकाः खाद्यसङ्ग्राहकाः च नृपेभ्यः किं यच्छन्तः स्युः ?

## कृषौ परिवर्तनानि

तस्मिन् युगे कृषिक्षेत्रे द्वे महत्-परिवर्तने जाते । अधुना हलस्य कृषिकः लौहेन निर्मीयन्ते स्म । येन काष्ठकृषिकस्य तोलनायां कठोरभूमिः सरलतया आकर्ष्टुं शक्यते स्म । एतस्मात् सस्यानाम् उत्पादकता वर्धिता । द्वितीयं अनेके जनाः धान्यस्य पादपानाम् आरोपणम् आरब्धवन्तः अर्थात् क्षेत्रेषु बीजानि विकीर्य धान्यस्य उत्पादनस्य स्थाने धान्यस्य पादपान् उत्पाद्य तेषां रोपणम् आरब्धवन्तः । अधुना पूर्वापेक्षया आधिक्येन पादपाः जीवन्ति स्म अतः उत्पादनम् अपि आधिक्येन आरब्धम् । अत्र महान् श्रमः अपेक्षते स्म । एतत् कार्यम् आधिक्येन दासाः दास्यः भूमिहीनकृषकाः श्रमिकाः वा कुर्वन्ति स्म ।

किं भवान् वक्तुं शक्नोति यत् राजानः एतेषां परिवर्तनानां प्रोत्साहनं किमर्थं कुर्वन्तः स्युः ?

## सूक्ष्म-निरीक्षणम्

### (क) मगधः

चतुर्थे मानचित्रे (५७ पृष्ठे) मगधम् अन्वेषयतु। प्रायः द्विशतेन वर्षैः एव मगधः सर्वेभ्यः महत्त्वपूर्णः जनपदः अभवत्। गङ्गा-सोन-सदृशाः नद्यः मगधे प्रवहन्ति स्म। एताः (क) यातायाताय (ख) जलवितरणाय (ग) भूमिम् उर्वरां च कर्तुं महत्त्वपूर्णाः आसन्। मगधस्य एकः भागः वनैः आच्छादितः आसीत्। वनेषु वसतः वन्यहस्तिनः गृहीत्वा प्रशिक्ष्य च सेनाकार्ये नियोज्यते स्म। इदम् एव न वनेभ्यः गृहाणि वाहनानि रथान् च निर्मातुं काष्ठानि लभन्ते स्म। एतद् अतिरिच्य एतस्मिन् क्षेत्रे लौहायस्कस्य आकराः सन्ति। दृढानि अस्त्राणि शस्त्राणि च निर्मातुं एते बहु उपयोगिनः आसन्।

मगधे बिम्बिसारः अजातशत्रुः च इति द्वौ अतीव शक्तिशालिनौ शासकौ अभवताम्। अन्यान् जनपदान् जेतुम् एतौ यथासम्भवं साधनानि कार्यपथे आनयन्ति स्म। महापद्मनन्दः कश्चित् अपरः महत्त्वपूर्णः शासकः आसीत्। सः स्व-नियन्त्रणक्षेत्रम् एतस्य उपमहाद्वीपस्य उत्तरपश्चिमभागं यावत् विस्तारितवान् आसीत्। बिहारे राजगृहम् (आधुनिक-राजगीरम्) इति बहूनि वर्षाणि यावत् मगधस्य राजधानी आसीत्। परवर्त्तिशासकैः अनन्तरं पाटलिपुत्रम् (वर्तमानपटना) इति राजधानी मता।

२३०० वर्षेभ्यः पूर्वकालस्य तथ्यम् अस्ति मेसिडोनियायाः राजा सिकन्दरः विश्वविजयं कर्तुम् इच्छति स्म। सम्पूर्णतया सफले असत्यपि सः मिस्र-पश्चिमेशिययोः च कानिचन राज्यानि जयन् भारतीयोपमहाद्वीपे व्यासनद्याः तटं यावत् प्राप्तवान्। यदा सः मगधं प्रति चलितुम् आरब्धवान् तदा तस्य सैनिकाः अस्वीकृतवन्तः। ते एतस्मात् कारणात् भयभीताः आसन् यत् भारतस्य शासकानां पार्श्वे पदाति-रथिक-हस्तिनां महत्यः सेनाः आसन्।

एतासां सेनानां ऋग्वेदोल्लिखित-सेनानां च मध्ये भवान् कां भिन्नतां पश्यति ?

### (ख) वज्जि

मगधस्य समीपे एव वज्जिराज्यम् आसीत्, यस्य राजधानी वैशाली (बिहारः) आसीत्। अत्र पृथक् काचित् शासनव्यवस्था आसीत् यः गणः सङ्घः वा इति उच्यते स्म।

गणे सङ्घे वा बहवः शासकाः भवन्ति स्म। कदाचित् जनाः युगपदेव शासनं कुर्वन्ति स्म। येषु प्रत्येकं जनः राजा इति उच्यते स्म। एते राजानः विभिन्नानुष्ठानानि सहैव सम्पादयन्ति स्म। सभासु उपविश्य एते चर्चामाध्यमेन विवादेन च निश्चयं कुर्वन्ति स्म यत् किं करणीयम् अस्ति अपि च कथं करणीयम् अस्ति। कथं शत्रूणाम् आक्रमणानां

> **गणः**
> गणशब्दस्य प्रयोगः बहूनां सदस्यानां समूहस्य कृते क्रियते।
> **सङ्घः**
> सङ्घः अर्थात् सङ्घटनम् अथवा सभा

शत्वाक्रमणानां प्रतिकारः करणीयः इति विषये अपि ते मिलित्वा चर्चयन्ति स्म । स्त्रियः दासाः कर्मकराः च एतासु सभासु भागं न ग्रहीतुं शक्नुवन्ति स्म। बुद्ध-महावीरौ (ययोः विषये भवान् सप्तमाध्याये पठिष्यति) द्वापि गणेन अथवा सङ्घेन सम्बद्धितौ आस्ताम्। बौद्धसाहित्ये सङ्घजीवनस्य बहु सजीवं वर्णनम् उपलभ्यते।

वज्जिसङ्घस्य वर्णनं दीघनिकायतः स्वीकृतः अस्ति । दीघनिकायः कश्चित् प्रसिद्धबौद्धग्रन्थः अस्ति, यस्मिन् बुद्धस्य अनेकानि व्याख्यानानि प्रदत्तानि सन्ति । एतानि प्रायः २३००वर्षेभ्यः पूर्वं लिखितानि आसन् ।

### अजासत्तु (अजातशत्रुः) अपि च वज्जि-सङ्घः

अजातसत्तुः वज्जि-सङ्घम् आक्रन्तुम् इच्छति स्म । सः स्व-मन्त्रिणं वस्सकारं बुद्धं निकषा परामर्शाय प्रेषितवान् । बुद्धः तं पृष्टवान् यत् किं वज्जिसभाः नियमितरूपेण भवन्ति अपि च तासु सर्वे सदस्याः नियमितरूपेण भवन्ति अपि च तासु सर्वे सदस्याः उपस्थिताः भवन्ति ? यदा सः ज्ञातवान् यत् इत्थं जायते तदा सः उक्तवान् यत् वज्जिवासिनः तावत्पर्यन्तं उन्नतिं करिष्यन्ति यावत्पर्यन्तम्-

- ते पूर्णाः नियमिताः च सभाः करिष्यन्ति ।
- परस्परं मिलित्वा कार्यं करिष्यन्ति ।
- पारम्परिकनियमानां पालनं करिष्यन्ति ।
- महतां सम्मानं समर्थनं तेषां शिक्षाणां च अनुपालनं करिष्यन्ति।
- वज्जिमहिलाभिः सह बलात्कारं न करिष्यन्ति अपि च ताः बन्धकीः न करिष्यन्ति ।
- नगरेषु ग्रामेषु च चैत्यानां संरक्षणं करिष्यन्ति ।
- विभिन्न-मतावलम्बि-साधूनां सम्मानं करिष्यन्ति अपि च तेषाम् आवागमने कञ्चन अपि प्रतिबन्धं न करिष्यन्ति।

वज्जिसङ्घः अन्येभ्यः जनपदेभ्यः कथं भिन्नः आसीत् ? न्यूनातिन्यूनं भेदत्रयं ज्ञापयतु ।

अनेके शक्तिशालिनः राजानः सङ्घान् जेतुम् इच्छन्ति स्म। एतद् अतिरिच्य तेषां राज्यम् वर्तमानसमयात् प्रायः १५०० वर्षेभ्यः पूर्वं यावत् अचलत् । तदनन्तरं गुप्तशासकाः गणे सङ्घे च विजयं प्राप्य तौ स्वराज्ये सम्मेलितवन्तः। एतस्मिन् विषये भवान् एकादशे अध्याये पठिष्यति।

अन्यत्र

स्वस्य मानचित्रे यूनानम् एथेन्सं च अन्वेषयतु ।

प्रायः २५००वर्षेभ्यः पूर्वं एथेन्सस्य जनाः काञ्चित् नूतनां शासनव्यवस्थाम् अङ्गीकृतवन्तः या गणतन्त्रं प्रजातन्त्रं वा इति उच्यते ।

इयं व्यवस्था प्रायः २०० वर्षाणि यावत् व्यवहारे आसीत् । अस्यां त्रिंशद्वर्षात् ऊर्ध्वस्य आयुवर्गस्य सर्वेषां पुरुषाणां कृते नागरिकता प्राप्ता आसीत् ये दासाः न आसन् । तत्र काचित् सभा आसीत् या महत्त्वपूर्णेषु विषयेषु निर्णयं स्वीकर्तुम् आवर्षं न्यूनातिन्यूनम् ४० वारम् आहूयते स्म ।

अस्यां सभायां सर्वे नागराः भागं ग्रहीतुं शक्नुवन्ति स्म ।

शासनस्य अनेकेषु पदेषु नियुक्तयः गुटिकापातेन क्रियन्ते स्म । सर्वैः नागरिकैः सेनायां नौसेनायां च निजसेवाः प्रदातव्याः भवन्ति स्म ।

महिलाः नागराधिकारं न प्राप्तुं शक्नुवन्ति स्म ।

वणिजः शिल्पकाराः च ये एथेन्समध्ये निवसन्ति स्म अपि च अनेके वैदेशिकाः ये तत्र कार्यं कुर्वन्ति स्म ते सर्वे अपि नागराधिकारान् न लभन्ते स्म । एथेन्स इत्यत्र आकरेषु क्षेत्रेषु कार्यशालासु च कार्यं कुर्वाणाः दासाः अपि नागराधिकारान् न प्राप्तवन्तः आसन् ।

किम् एथेन्से वास्तविकतायां जनतन्त्रम् आसीत् ?

कल्पनां करोतु

वैशाल्याः तस्मिन् सभागारे भवान् अन्तः जालमार्गेण पश्यति यत्र मगधस्य राजभिः आक्रमणानां सम्मुखीकरण-विषयेषु चर्चा प्रचलन्ती अस्ति । भवान् किं श्रुतवान् ?

उपयोगि-शब्दः
**राजा**
**अश्वमेधः**
**वर्णः**
**जनपदः**
**महाजनपदः**
**दुर्गनिर्माणम्**
**सेना**
**करः**
**पादप-रोपणम्**
**गणः अथवा सङ्घः**
**प्रजातन्त्रम्**

## आगच्छन्तु स्मरणं कुर्मः



१. उचितम् अनुचितं च ज्ञापयतु ।

क) अश्वमेधस्य अश्वं स्वराज्यात् निर्गमनस्य मुक्ततां ये राजानः यच्छन्ति स्म ते राजानः यज्ञे आमन्त्र्यन्ते स्म ।

ख) राजानम् उपरि सारथी पवित्रजलस्य सेचनं करोति स्म ।

ग) पुरातत्त्वविदः जनपदानां निवासेषु प्रासादान् प्राप्तवन्तः ।

घ) चित्रित-धूसरपात्रेषु अन्नानि स्थाप्यन्ते स्म ।

ङ) महाजनपदेषु अनेकानि नगराणि दुर्गबद्धानि आसन् ।

२. अधोलिखितेषु कोष्ठकेषु निम्नलिखितान् शब्दान् पूरयन्तु ।

आखेटक-सङ्ग्राहकः, कृषकः, वणिक्, शिल्पकारः, पशुपालकः ।




३. ते समाजस्य के समूहाः आसन्, ये गणानां सभासु भागं न ग्रहीतुं शक्नुवन्ति स्म?

## आगच्छतु चर्चयामः



१. महाजनपदस्य राजानः दुर्गान् किमर्थं निर्मापितवन्तः ?
२. वर्तमानस्य शासकानां निर्वाचनस्य प्रक्रिया जनपदानां निर्वाचनात् केन प्रकारेण भिन्ना आसीत् ?

## आगच्छतु कृत्वा पश्यामः



३. भवतः पुस्तकस्य अन्ते प्रदत्तराजनैतिक-मानचित्रे स्वराज्यम् अन्वेषयतु । किं तत्र प्राचीनजनपदाः आसन् ? यदि आम्, तर्हि तेषां नामानि लिखतु । यदि नैव, तर्हि स्वस्य राज्यस्य समीपतमानां जनपदानां नामानि लिखतु ।
४. द्वितीयप्रश्नस्य उत्तरे बोधितसमूहेषु कैः समूहैः अद्य अपि करः प्रदीयते ?
५. तृतीयप्रश्नस्य उत्तरे बोधितसमूहेषु के के अद्य अपि मतदानस्य अधिकारं प्राप्तवन्तः सन्ति ?

**काश्चन महत्त्वपूर्णतिथयः**

- नूतनशासकाः (प्रायः ३०००वर्षेभ्यः पूर्वम्)
- महाजनपदः (प्रायः ३०००वर्षेभ्यः पूर्वम्)
- अलक्ष्येन्द्रस्य आक्रमणम्, दीघनिकायस्य लेखनम् (प्रायः २३००वर्षेभ्यः)
- गणराज्यानां सङ्घराज्यानां च समाप्तिः । (प्रायः १५००वर्षेभ्यः पूर्वम्)

इति षष्ठोऽध्यायः